# संस्कृतवार्ताः

**दिनाङ्क : 18/01/2025** **सायम् - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

-------------------------------------

**आदौ मुख्यवार्ताः**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना दशसु राज्येषु द्वयो: केन्द्रशासितप्रदेशयो: च स्वामित्व-योजनायाः अन्तर्गतं पञ्चषष्टीलक्षाधिकं सम्पत्तिपत्राणि वितरितानि। इयं योजना भूमि-प्रबन्धने ग्रामीण-समुदायानां शक्तीकरणाय महत्त्वपूर्णा अस्तीति प्रधानमन्त्री अवोचत्।
- प्रधानमन्त्री नरेन्द्रमोदी श्व: 'मन की बात' इत्येतस्य कार्यक्रमस्य अष्टादशाधिकैकशततमे संस्करणे देशवासिभिः साकं विचार-विनिमयं करिष्यति।
- सप्तति-सदस्यात्मिकायाः दिल्ली-विधानसभायाः निर्वाचनार्थम् आहत्य एकविंशत्यधिक-पञ्चशतोत्तरसहस्र-नामाङ्कनानि पञ्जीकृतानि ।
- गजा- युद्धविरामाय बन्धकानां विमुक्तये च हमासेन सह जातायाः सन्धेः प्रथमे सोपाने इस्राइलदेशः पञ्चत्रिंशदधिक-सप्तशतसङ्ख्यकान् फलस्तीनदेशीयान् बन्धकान् विमोचयिष्यति ।
- खो-खो इति विश्व-चषक प्रतिस्पर्धायाम् अद्य भारतीय-पुरुष-महिला-दले उपान्त्यचक्राय क्रीडिष्यत:।

-------------------------------------

**प्रधानमन्त्री-स्वामित्व**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्यपरान्तर्जालीय-माध्यमेन सम्पत्स्वामिभ्य: स्वामित्व-योजनान्तर्गतं पञ्चषष्टिलक्षाधिकानि सम्पत्ति-पत्रकानि वितरितवान्। दशराज्यानां द्वयो: केन्द्रशासित प्रदेशयो: पञ्चाशत्सहस्त्राधिकेषु ग्रामेषु सम्पत्ति-पत्रकानि वितरितानि। अवसरेऽस्मिन् प्रधानमन्त्रिणा प्रोक्तं यत् ग्रामीण-अर्थव्यवस्थायै इदं ऐतिहासिकं दिनं वर्तते। तेनोदीरितं यत् स्वामित्व-योजनाया: क्रियान्वयनानन्तरं विगतेषु पञ्चविंशति-लक्षाधिक-द्विकोट्यधिकानि सम्पत्ति-पत्राणि निस्सारितानि सन्ति।

लाभार्थिभि: सह संवादक्रमे श्रीमोदिना प्रोक्तं यत् सम्पत्ते: प्रलेखपत्राणामभाव: विशिष्टसमस्या वर्तते। एता: समस्या: विवादस्पदा: भवितुमर्हन्ति। तेनोदीरितं यत् सम्पत्ते: उचितप्रलेखपत्रै: वित्तालयेषु ऋण- प्राप्तौ सरलता भविष्यति। सहैव तेन कथितं यत् सम्पत्ते: प्रलेखपत्राणि देशे शतलक्षकोटि-रूप्यकाणाम् आर्थिक-क्षमताम्  उद्घाटयिष्यन्ति।

प्रधानमन्त्रिणा कथितं यत् स्वामित्व-योजनायां ग्रामीण-अर्थव्यवस्था विकासस्य मुख्यस्तम्भ: भविष्यति। श्रीमोदिना कथितं यत् प्रशासनेन भूम्यभिलेखानां प्रविधिकरणे अपि कार्यं विधीयते। तेन प्रोक्तं यत् विगतेषु सप्ताष्टवर्षेषु देशे अष्टनवति: प्रतिशतं भूम्यभिलेखानां प्रविधिकरणं समभवत्। तेन एतदपि प्रोक्तं यत् सम्पत्ते: अधिकारप्रापणेन ग्राम-पंचायतानामपि समस्या: दूरी भविष्यन्ति। सहैव वैध-सम्पत्ति-प्रलेखै: आपत्स्थितौ सम्पत्ते: स्वामित्व-प्रदर्शनमपि सरलीभविष्यति।

-------------------------------------

**‘मन की बात’-कार्यक्रम:**

प्रधानमन्त्री नरेन्द्रमोदी श्व: एकादशवादने स्वीये ‘मन की बात’ इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। ‘मन की बात’ इत्यस्य मासिक-कार्यक्रमस्य इदम् अष्टादशाधिकैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

-------------------------------------

**निर्वाचनयोगः-नामाङ्कनप्राप्तांश:**

सप्तति-सदस्यात्मिकायाः दिल्ली-विधानसभायाः निर्वाचनार्थम् आहत्य एकविंशत्यधिक-पञ्चशतोत्तरसहस्रं नामाङ्कनानि पञ्जीकृतानि। निर्वाचनायोगानुसारि ह्यः नामाङ्कनस्य अन्तिमदिने अशीत्युत्तर-षड्शतं नामाङ्कनपत्राणि समाङ्कितानि। आयोगेन प्रोक्तं यत् नवदिल्लीविधानसभा-क्षेत्रे सर्वाधिक-नामाङ्कन-पत्राणि पञ्जीकृतानि। एतस्मै आसनाय आहत्य एकोनत्रिंशत्-प्रत्याशिभिः चत्वारिंशत् नामाङ्कनपत्राणि अपूर्यन्त। आमआदमी-पार्टीतिदलस्य राष्ट्रिय-संयोजकः अरविन्द-केजरीवालः भाजपेतिदलस्य परवेश-वर्म्माणं तथैव काङ्ग्रेसदलस्य संजीव-दीक्षितञ्च विरुध्य निर्वाचनद्वन्द्वे भागं भजिष्यति। आयोगेन एतदपि प्रोक्तं यत् अष्टादश-प्रत्याशिभिः कालकाजीति आसनात् अष्टाविंशति - नामाङ्कन पत्राणि प्रपूरितानि । यतः वर्तमान-मुख्यमन्त्री आतिशिः भाजपायाः रमेश-बिधूड़ी काङ्ग्रेसस्य अलका लाङ्बा इत्येतञ्च निर्वाचनद्वन्द्वे सम्मुखीकरिष्यति। नामाङ्कन-पत्राणाम् अनुसन्धेयकार्यं जायमानमस्ति नामाङ्कन-प्रत्यावर्तनस्य अन्तिमतिथिः अस्य मासस्य विंशतिः दिनाङ्कं यावत् वर्तते।

-------------------------------------

## *महाकुम्भः*

*आध्यात्मिक-सङ्गमनगरे प्रयागराजे श्रद्धालवः तीर्थयात्रिणश्च अधुना आकाशवाण्याः महाकुम्भसम्बद्धाः कुम्भवाणी-वार्ताः सार्वजनिक-सम्बोधन-प्रणाल्याः माध्यमेन श्रोतुंशक्नुवन्ति। अद्य प्रातः काले सार्धाष्टवादने कुम्भवाणी-वार्ता-प्रसारणं महाकुम्भनगर्यां सार्वजनिक-सम्बोधन-प्रणालि-माध्यमेन जातम्। अनेन पदक्षेपेण श्रद्धालूभ्यः तीर्थयात्रिभ्यश्च मेलकसम्बद्धानां विविध-क्रियाकलापनं सूचनां प्रदास्यति। दशनिमेषात्मकीयाः इयं कुम्भवाणीवार्ताः प्रातःकाले सार्धाष्टवादने मध्याह्ने सार्ध-द्विवादने अपरत्र सायंकाले साधष्टि वादने प्रसारयन्ते। अस्या कुम्भवाणी-नामाख्यायाः वाहिन्याः शुभारम्भः अस्य मासस्य दशमे दिनाङ्के प्रयागराजे उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगिआदित्यनाथेन केन्द्रीय-सूचनाप्रसारण राज्यमन्त्रिणा डॉ एल्-मुरुगन इत्यनेन च कृतः। महाकुम्भाय समर्पिता इयं कुम्भवाणी फरवरीमासस्य षड्विंशं दिनाङ्कं यावत् प्रचलिष्यति।*

*शुभावसरेऽस्मिन् रक्षामन्त्री राजनाथसिंहः अपि सङ्गमे पुण्यावगाहनं समाचरितवान्। पवित्रास्नानान्तरं कृतार्थः अनुभूयते मया इत्यपि सः उक्तवान्। अग्रे च कथितवान् यत् इदं हि खलु भारतीयसांस्कृतिक-सनातनधर्मस्य-आध्यात्मिक अनुभूतेः च पवित्रपर्व विद्यते इति।*

-------------------------------------

## भारतं -सन्धिपत्रमेकम्

भारतामेरिकादेशाभ्याम् एकस्मिन् सहभागिताज्ञापनपत्रे हस्ताक्षरं कृतम्। एतत् सन्धिपत्रम् आन्तार्जालिकापराधनिरीक्षणे सहयोगसूचनयोः विवरणेन सम्बद्धं वर्तते। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः सामाजिकसन्देशपटले सूचितवान् यत् अस्मिन् सन्धिज्ञापनपत्रे अमरिकायां भारतस्य राजदूतः विनयमोहनक्वात्रा इत्यसौ वाशिंग्टन डीसी-नगरे कार्यवाहकः अमरीका-देशीयः गृहसुरक्षायाः उपसचिवः क्रिस्टी-कैनेगैलो इत्यसौ च हस्ताक्षरं कृतवन्तौ।

-------------------------------------

## इजराइल-युद्धविरामः

गजा- युद्धविरामाय बन्धकानां विमुक्तये च हमासेन सह जातायाः सन्धेः प्रथमे सोपाने इस्राइल देशः पञ्चत्रिंशदधिक-सप्तशतसङ्खकान् फलस्तीनदेशीयान् बन्धकान् विमोचयिष्यति। इजराइल देशस्य न्याय मंत्रालयानुसारि त्रिचरणात्मिकी इयं सन्धिः श्वः प्रवर्तयिष्यते । प्रथमं चरणं द्विचत्वारिंशद्दिवसान् यावत्प्रचलिष्यति। अत्रावधौ इस्राइलस्य त्रयस्त्रिंशत्-बन्धकाः विमुक्ताः भविष्यन्ति ।

-------------------------------------

## क्रिकेट्-प्रतिस्पर्धा

मलेशियायामद्य द्वितीया आई.सी.सी. अण्डर-19 इति महिला-क्रिकेट्-विश्व-चषक-स्पर्धा समारब्धा। प्रथमे द्वन्दे ऑस्ट्रेलिया-दलेन स्कॉटलैण्डदलं नवस्तोभै: पराभूतम्। भारतीयदलं श्व: वेस्टइण्डिज-दलं सम्मुखीकरिष्यति। ध्यातव्यमस्ति यत् त्रयोविंशत्यधिक-द्विसहस्र-तमवर्षीयायां प्रतिस्पर्धायां भारतेन इंग्लैण्डं पराजित्य प्रथम: विश्वचषक: विजित:।

------------------------------------

## खो-खो-इति स्पर्धा

खो-खो इति विश्व-चषक प्रतिस्पर्धायाम् अद्य भारतीय-पुरुष-महिला-दले उपान्त्यचक्राय क्रिडिष्यत:। भारतीय-महिला दलमद्य सायं नवदिल्ल्या: इन्दिरा-गांधी-आन्तरिक-क्रीडाङ्गणे दक्षिणाफ्रीकादलेन सह स्पर्धिष्यति। तदनु भारतीयपुरुषदलमपि दक्षिणाफ्रीकाया: पुरुषदलेन सह स्पर्धां करिष्यति या हि सपादाष्टवादने क्रीडिष्यते।

------------------------------------

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति।

**।। इति वार्ता:।।**